# Sri Rudram

## 1ST ANUVAKA

ॐ नमो भगवते रुद्राय ॥

om namo bhagavate rudrāya ||

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः ।नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।

om namaste rudra manyava utota iṣave namaḥ |namaste astu dhanvane bāhubhyāmuta te namaḥ |

या त इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय ।

yā ta iṣuḥ śivatamā śivaṁ babhūva te dhanuḥ | śivā śaravyā yā tava tayā no rudra mṛḍaya |

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा शन्तमया गिरिशंताभिचाकशीहि ।

yā te rudra śivā tanūraghorā'pāpakāśinī | tayā nastanuvā śantamayā giriśaṁtābhicākaśīhi |

यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिगूंसीः पुरुषं जगत् ।

yāmiṣuṁ giriśanta haste bibharṣyastave । śivāṁ giritra tāṁ kuru mā higṁsīḥ puruṣaṁ jagat ।

शिवेन वचसा त्वा गिरिशाच्छावदामसि ।यथा नः सर्वमिज्जगदयक्ष्मगूं सुमना असत् ।

śivena vacasā tvā giriśācchāvadāmasi ।yathā naḥ sarvamijjagadayakṣmagṁ sumanā asat ।

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।अहीगूंश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ।

adhyavocadadhivaktā prathamo daivyo bhiṣak ।ahīgśca sarvāñjambhayantsarvāśca yātudhānyaḥ ।

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।ये चेमागूं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषागूं हेड ईमहे ।

asau yastāmro aruṇa uta babhruḥ sumaṅgalaḥ । ye cemāgṁ rudrā abhito dikṣu śritāḥ sahasraśo'vaiṣāgṁ heḍa īmahe ।

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ।

asau yo'vasarpati nīlagrīvo vilohitaḥ । utainaṁ gopā adṛśannadṛśannudahāryaḥ ।

उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।

utainaṁ viśvā bhūtāni sa dṛṣṭho mṛḍayāti naḥ ।

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य सत्त्वानोऽहं तेभ्योऽकरन्नमः ।

namo astu nīlagrīvāya sahasrākṣāya mīḍhuṣe ।atho ye asya sattvāno'haṁ tebhyo karannamaḥ ।

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नि योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप ।

pramuñca dhanvanastvamubhayorārtni yorjyām ।yāśca te hasta iṣavaḥ parā tā bhagavo vapa ।

अवतत्य धनुस्त्वगं सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।

avatatya dhanustvagṁ sahasrākṣa śateṣudhe । niśīrya śalyānāṁ mukhā śivo naḥ sumanā bhava ।

विज्यं धनुः कपर्दिनो विशल्यो बाणवागं उत । अनेशन्नस्येषव आभुरस्य निषंगथिः

vijyaṁ dhanuḥ kapardino viśalyo bāṇavāgm uta । aneśannasyeṣava ābhurasya niṣaṁgathiḥ

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।तयाऽस्मान्, विश्वतस्त्वमयक्ष्मया परिब्भुज ।

yā te hetirmīḍhuṣṭama haste babhūva te dhanuḥ । tayā'smān viśvatastvamayakṣmayā paribbhuja ।

नमस्ते अस्त्वायुधायानातताय धृष्णवे ।उभभ्यामुत ते नमो बाहुभ्यां तव धन्वने ।

namaste astvāyudhāyānātatāya dhṛṣṇave ।ubhabhyāmuta te namo bāhubhyāṁ tava dhanvane ।

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥

pari te dhanvano hetirasmānvṛṇaktu viśvataḥ । atho ya iṣudhistavāre asmannidhehi tam ॥

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥१ ॥

namaste astu bhagavanviśveśvarāya mahādevāya tryambakāya tripurāntakāya trikāgnikālāya kālāgnirudrāya nīlakaṇṭhāya mṛtyuñjayāya sarveśvarāya sadāśivāya śrīmanmahādevāya namaḥ ॥1॥